तमेव कृत्वा मनसि तपश्चर्य्योपदेशकम् ।
पतिलेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणम् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
तस्याः पुरोडाशमयं शरीरं तत्क्षणात्ततः ।
दग्धं पुरोडाशगन्धं व्यस्तारयदलक्षितम् ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत्शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्धभागं तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगा ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा ॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्या सा पितॄणां मोदकारिणी ॥"
इति श्रीकालिकापुराणे अरुन्धतीजन्मकथने २२ अध्यायः ॥

सायंसन्ध्यादेवता, स्त्री,(सायंसन्ध्याया देवता ।) सरस्वती । इति कविकल्पलता ॥

सायः,पुं, (स्यति समापयति दिनमिति । षो + श्याद्व्यधेति णः । ततो युगागमः ।) दिनान्तः । इत्यमरः । १ । ४ । ३ ॥ बाणः । इति मेदिनी ॥ सायोत्सवौ विकालके । इति त्रिकाण्डशेषः ॥

सा(शा)यकः, पुं, ( स्यति छिनत्तीति । षो + ण्वुल् + युक् । ) बाणः । ( यथा, रामायणे । २ । ३१ । ३० !
"अभेद्ये कवचे दिव्ये तूणी चाक्षय्यसायकौ ॥")
खड्गः । इत्यमरः । ३।३।२ ॥ ( यथा, महाभारते । ४ । ४० । १४ ।
"कस्य पाञ्चनखे कोषे सायको हेमविग्रहः ।
प्रमाणरूपसम्पन्नः पीत आकाशसन्निभः ॥"
पञ्चमसंख्या । यथा, साहित्यदर्पणे । ४।२६४।
"सङ्करेण त्रिरूपेण संसृष्टा चैकरूपया ।
वेदखाग्निशराः शुद्धे रिषुबाणाग्निसायकाः ॥")

सायकपुङ्खा, स्त्री, ( सायकस्य पुङ्ख इव पुङ्खो यस्याः । ) शरपुङ्खा । इति राजनिर्घण्टः ॥ ( सायकस्य पुङ्खे, पुं । यथा, रघुः । २ ।३१ ।
"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥" )

सायन्तनः, त्रि, ( सायं भवः । सायम् + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४।३। २३ । इति ट्युल् तुट् च । ) सायंकालभवः । यथा,—
"सन्ध्यां सायन्तनीं कुर्य्यात् द्वादश्यादिष्वपि प्रिये ।
अकुर्व्वन्निरयं याति यतो नित्यागमक्रिया ॥"
इति बृहन्नीलतन्त्रे प्रथमपटलः ॥

सायाह्नः, पुं, (सायमह्नः । "संख्याविसायेति ।" ६।३।११० । ज्ञापकात् समासः ।) पञ्चधाविभक्तदिनपञ्चमांशः । दिवसस्य शेषमुहूर्त्तत्रयम् । यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम् ॥
सायाह्नस्त्रिमुहूर्त्तं स्यात् श्राद्धं तत्र न कारयेत्
राक्षसी नाम सा वेला गर्हिता सर्व्वकर्म्मसु ॥"
इति तिथ्यादितत्त्वम् ॥
तत्पर्य्यायः ।
"सायो दिनान्तः सायाह्नो विकालः सायमेव च" इति शब्दरत्नावली ॥

सायिका,स्त्री,क्रमस्थितिः । इति शब्दरत्नावली॥

सायी, [ न् ] पुं, (सायति नाशयति गतिक्लेशमिति । षै क्षये + णिनिः ।) अश्वारोहः । इति केचित् ॥

सायुज्यं, क्ली, ( सयुजो सहयोगस्य भावः । ब्राह्मणादित्वात् ष्यञ् ।) सहयोगः । एकत्वम् । तत्तु पञ्चधामुक्त्यन्तर्गतमुक्तिविशेषः । यथा,—
"सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥"
इति श्रीभागवते । ३ । २९ । १३ ॥
"भक्तानां निष्कामतां कैमुतिकन्यायेनाह । सालोक्यं मया सह एकस्मिन् लोके वासम् । सार्ष्टिं समानैश्वर्य्यम् । सामीप्यं निकटवर्त्तित्वम् । सारूप्यं समानरूपताम् । एकत्वं सायुज्यम् । उत अपि दीयमानमपि न गृह्णन्ति कुतस्तत्कामनाः इत्यर्थः ।" इति श्रीधरस्वामी॥ "एकत्वं भगवत्सायुज्यं ब्रह्मसायुज्यञ्च । अनयोस्तल्लीलात्मकत्वेन तत्सेवनार्थत्वाभावात् अग्रहणावश्यकत्वमेवेति भावः ।"इति क्रमसन्दर्भः ॥

सायै, व्य, दिनान्ते । सायंकाले । इति केचित्॥

सार, त् क दौर्ब्बल्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरा०-पर०-अक०-सेट् ।) रेफोपधः । असंसारत् । इति दुर्गादासः ॥

सारं,क्ली,पुं,(सार त् क दौर्ब्बल्ये + अच् । सृ गतौ + घञ् इति वा । ) जलम् । धनम् । ( यथा, रघुः । ४ । ७८ ।
"परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥" )
न्याय्यम् । इति मेदिनी । ( सरात् जातम् । सर + अण् ।)नवनीतम् । इति राजनिर्घण्टः ॥ ( यथा, सुश्रुते उत्तरतन्त्रे । २६ ।
"क्षीरशेषञ्च तन्मथ्यं शीतं सारमुपाहरेत् ॥"
अमृतम् । यथा, भागवते । ७ । ६ । २५ ।
"धर्म्मादयः किमगुणेन च काङ्क्षितेन
सारं जुषां चरणयोरुपगायतां नः ॥")
लौहम् । इति भावप्रकाशः । विपिनम् । इति शब्दरत्नावली ॥*॥ सारवस्तूनि यथा, —
"सारं रसानान्तु घृतं घृतसारं घृतञ्च यत् ।
घृतस्य सारं स्वर्गञ्च स्वर्गात् सारन्तु योषितः॥
अतो राजन् प्रदेयाः स्युः स्त्रियः स्वर्गमभीप्सतः ।
तथैवेह सुखं ताभिः सह राज्यं नृपोत्तम ॥"
इति वह्निपुराणे दासीदानाध्यायः ॥
अपि च ।
"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वासः सतां सङ्गो गङ्गाम्भः शम्भुसेवनम् ॥"
इति कवितारत्नाकरधृतपुराणवचनम् ॥

सारः, पुं, (सृ + "सृ स्थिरे ।" ३।३।१७ । इति घञ् ।) बलम् । (यथा, महाभारते ।१।१५५। २३ ।
"तस्य भीम मा क्रीड़ जहि रक्षो विभीषणम् ।
पुरा विकुरुते मायां भुजयोः सारमर्पय ॥" )
स्थिरांशः । इत्यमरः । ३ । ३ । १७० ॥ (यथा, रघुः । १० । १० ।
"प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ।
कौस्तुभाख्यमपां सारं बिभ्राणं बृहतोरसा ॥")
मज्जा । इत्यमरः । २ । ४ । १२ ॥ वज्रक्षारम् । इति राजनिर्घण्टः ॥ वायुः । इति जटाधरः ॥ रोगः । इति धरणिः ॥ पाशकः । इति शब्दरत्नावली ॥ दध्युत्तरम् । इति शब्दचन्द्रिका ॥ ( अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ७३१ ।
"उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते ॥"
यथा,—
"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनासर्व्वस्वम् ॥" )

सारः, त्रि, ( सृ + घञ् । ) अतिदृढ़ः । इति शब्दरत्नावली ॥ वरः । श्रेष्ठः । इत्यमरमेदिनीकरौ ॥ यथा,—
"सर्व्वसारो यथा कृष्णो व्रतानां पुस्तकं तथा ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे । ३।३०॥
अपि च ।
श्रीमार्कण्डेय उवाच ।
"जगत् सर्व्वन्तु निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते क्षणादेतत् क्षणादेतत् विपद्यते ॥
यथैवोत्पद्यते सारान्निःसारं जगदञ्जसा ।
पुनस्तस्मिन्विलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगन्निसारतां हरिः ।
शम्भवे दर्शयामास भावेन जगतां पतिः ॥
एकं शिवं शान्तमनन्तमच्युतं
परात्परं ज्ञानमयं विशेषम् ।
अद्वैतमव्यग्रमचिन्त्यरूपं
सारन्त्वेकं नास्ति सारं त्वदन्यत् ॥
यस्मादेतज्जायते विश्वमग्र्यं
यस्मिन्लीनं स्यात् तत्पश्चात् स्थितञ्च ।
आकाशवन्मेघजालस्य हृत्वा
यद्विश्वं वै भ्रियते तच्च सारम् ॥
अष्टाङ्गयोगैर्यदाप्तुमिच्छन्
योगी युनक्त्यात्मरूपं सदैव ।
निवर्त्तते प्राप्य यतश्च लोके
तद्वै सारं सारमन्यन्न चास्ति ॥